# श्रीरामकृष्णनाम संकीर्तनम्

(ध्यानम्) सर्वजीवपापनाशकारणं भवेश्वरं, स्वीकृतञ्च गर्भवासदेहपाशमीदृशम्।
यापितं स्वलीलया च येन दिव्यजीवनं, तं नमामि देवदेवरामकृष्णमीश्वरम्॥

(प्रणाम्) ॐ श्रीविवेकानन्दादि-सच्छिष्य-सुपूजिताय श्रीशारदादेव्याऽविरत-सेविताय श्रीरामकृष्णपरमहंसाय अवतारवरिष्ठाय च ते नमः॥

**( जीवनकथनम्) परब्रह्म-पराशक्ति-जगद्रूप रामकृष्ण। धर्मरक्षणाय जगति देहधारि रामकृष्ण॥**

| | | | | | |
|---|---|---|---|---|---|
| १ | जन्मपूत वङ्गदेश-विप्रवंश | रामकृष्ण। | ५ | सप्तमाब्द-लुप्तपितृप्रेम-बाल | रामकृष्ण। |
| २ | चन्द्रमणि-क्षुदिराम-सौख्यदातृ- | " | ६ | बाल्य एव विरागाग्नि-दह्यमान | " |
| ३ | शैशवेऽपि शिल्पगीत-कलानिपुण | " | ७ | भूतभुवि ध्यानमग्न-बालयोगि- | " |
| ४ | पक्षिपंक्ति दर्शनात् समाधिमाप्त | रामकृष्ण॥ | ८ | भिक्षुयोगिसाधुसङ्ग-मोदमान | रामकृष्ण॥ |
| ९ | विशालाक्षिसद्मपथे विस्मृतात्म- | रामकृष्ण। | १३ | शैवरात्रि नाटके शिवायमान | रामकृष्ण। |
| १० | सूत्रधरणकाल-पालित-प्रतिज्ञ | " | १४ | श्रीनिवास-वलयकार-पूजिताङ्घ्रि | " |
| ११ | धनीदत्त भिक्षयाऽति-तुष्यमाण | " | १५ | सदा भक्तिगीत-देवपूजनरत | " |
| १२ | सूरिसभा-राजमान-बालसूर्य | रामकृष्ण॥ | १६ | कृष्णरागयुक्त-राधिकायमान | रामकृष्ण॥ |
| १७ | लोकशिक्षणं विहाय मोक्षकाम | रामकृष्ण। | २१ | आत्महनन-समय-दत्त-मातृदृष्टि | रामकृष्ण। |
| १८ | दक्षिणेश-कालिकार्चनादि-निरत | " | २२ | सर्वकाल-जगन्मातृ-दृष्टिभरित | " |
| १९ | भक्तिहीन-रासमणिं-ताडितवन् | " | २३ | शिवोन्मादनिरासाय कृतोद्वाह | " |
| २० | जगन्मातृ-दर्शनाय रोरुवन् हि | रामकृष्ण॥ | २४ | विवाहे कृतेऽपि तवाचलं मनो | रामकृष्ण॥ |
| २५ | भैरवेयपादतले शिष्यभूत | रामकृष्ण। | २९ | कृष्णभक्ति-विस्मृतात्म-राधिकैव | रामकृष्ण। |
| २६ | तन्त्रशास्त्र-साधनेन सिद्धिमाप्त | " | ३० | तोतापुरि-विदितवेदशिरस्तत्त्व | " |
| २७ | भक्तिमग्नचित्तयुक्त-परमभक्त | " | ३१ | चिरसमाधि-मेरुशिखर-दृढ़स्थान | " |
| २८ | रामभक्ति-विस्मृतात्म-वानरसम | रामकृष्ण॥ | ३२ | साधनसमयेऽपि शिक्षितात्मगुरो | रामकृष्ण॥ |
| ३३ | क्रैस्तपूर्व चित्रधर्म-चरणनिरत | रामकृष्ण। | ३७ | प्रयागादि-तीर्थनगर्यटनशील | रामकृष्ण। |
| ३४ | सर्वधर्म-समानत्त्व-सत्यदर्शि | " | ३८ | तत्र दुःखिजनान् वीक्ष्य मोचिताश्रु- | " |
| ३५ | एक वस्तु-विविधनाम-तत्त्वदर्शि | " | ३९ | स्वपत्न्यामपूर्वमातृदृष्टिभर्तृ- | " |
| ३६ | स्वपत्नै विशुद्ध हर्ष -बोधदातृ | रामकृष्ण॥ | ४० | समाधिस्थ-सारदां सुपूजितवन् | रामकृष्ण॥ |
| ४१ | ब्राह्मसभ्य-केशवादि-कर्षितवन् | रामकृष्ण। | ४५ | नरेन्द्रादि-छात्रकोटि-शिक्षमाण | रामकृष्ण। |
| ४२ | भक्तसेवकागमं प्रतीक्षमाण | " | ४६ | भक्तपापकर्षणाद्रुजराग्रस्त | " |
| ४३ | साधुशिष्य-भक्तवृन्द-भृङ्ग कमल | " | ४७ | रोगदुःखनिर्विषण्ण-मनोयुक्त | " |
| ४४ | साधुशिष्य-भक्त-हृदय-कमल-तरणि | रामकृष्ण॥ | ४८ | महासमाधौ हि परब्रह्मलीन | रामकृष्ण॥ |

### ( गुणकथनम् )

| | | | | | |
|---|---|---|---|---|---|
| ४९ | निर्विकार-निराकार-परब्रह्म | रामकृष्ण । | ५३ | साधकाद्यनुग्रहाय वपुर्धरसि | रामकृष्ण । |
| ५० | जगत्-सृष्टि-कर्तृ-पातृ-हन्तृ-देव | " | ५४ | सुन्दरतनु-दीप्तवदन-कृपादृष्टि | " |
| ५१ | तैलवत्तिलेषु जगत्यभिव्याप्त | " | ५५ | सर्वकाल-मन्दहास-रुचिर वक्त्र | " |
| ५२ | सर्वभूत-हृदयदेश-बुद्धिसाक्षि | रामकृष्ण ॥ | ५६ | सुमनसाऽपि छेदयोग्य-मृदुशरीर | रामकृष्ण ॥ |
| ५७ | वेदशास्त्र-पुराणादि-सारवेत्तृ- | रामकृष्ण । | ६१ | दीनबन्धु-दयासिन्धु-संश्रितगति- | रामकृष्ण । |
| ५८ | सर्ववेदशास्त्रवाकप्रमाण कर्तृ- | " | ६२ | अपरिशुद्ध-गिरिशाचन्द्र-शरणदातृ | " |
| ५९ | ज्ञानिजनो यस्य पदेऽर्भकायितो | " | ६३ | पुत्रशोकतप्त-मातृ-शान्तिदायि- | " |
| ६० | कुशलमते तीक्ष्णमनाः प्राज्ञ कवे | रामकृष्ण ॥ | ६४ | कुष्ठरोगि-घोररुजां-विनाशायसि | रामकृष्ण ॥ |
| ६५ | मृत्सुवर्ण-समानत्त्व-दर्शितवन् | रामकृष्ण । | ६९ | घनीभूत-सत्यवयुन-हर्षरूप | रामकृष्ण । |
| ६६ | सर्वदशा-कनक-काम-वर्जित-यति | " | ७० | प्रेमरूप पूर्णरूप शक्तिरूप | " |
| ६७ | आमरणं-प्रास्खलित -ब्रह्मचर्य | " | ७१ | सकल-कुवासना-बीज-नाशकारि- | " |
| ६८ | निखिलतमोऽशेष-हन्तृ-भासमान | रामकृष्ण ॥ | ७२ | कलुषहरण-मधुरधरण-भवसुवैद्य | रामकृष्ण ॥ |
| ७३ | सहजनित्य-शुद्ध-बुद्ध-मुक्त-रूप | रामकृष्ण । | ७७ | लोकसंग्रहाय सतत-कर्म-निरत | रामकृष्ण । |
| ७४ | ज्ञानयोगसिद्धिमचिरमाप भवान् | " | ७८ | कृत्स्नयोगसिद्धितुल्यपादधूलि | " |
| ७५ | निर्विकल्पसिद्धिमाप्त-राजयोगि | " | ७९ | योगगम्य योगिगम्य देवदेव | " |
| ७६ | देवनाम-निशामनादश्रुविमुग् | रामकृष्ण ॥ | ८० | निखिलयोगिपते योगसिद्धिदातृ | रामकृष्ण ॥ |

### ( उपदेशकथनम् )

| | | | | | |
|---|---|---|---|---|---|
| ८१ | ऋक्षमहन्यदृष्टमपि भवत्येव | रामकृष्ण । | ८५ | तस्य बन्धुरहङ्कार इतीरितो | रामकृष्ण । |
| ८२ | अज्ञगूढ़ ईश्वरोऽपि तथा भवति | " | ८६ | भक्तिहीन पण्डितस्तु गृध्रसमो | " |
| ८३ | माययाऽपिहितत्त्वादवीक्षितस्तु | " | ८७ | साधिकारपुरुष एव गुरुर्भवेद् | " |
| ८४ | हेमकामगणं कुमायेति वेद्मि | रामकृष्ण ॥ | ८८ | असति जगति मग्नजनोऽमुक्त एव | रामकृष्ण ॥ |
| ८९ | साधुसङ्ग-नामजपौ मोक्षकरौ | रामकृष्ण । | ९३ | श्रद्दधान इमां मुक्तिमचिरमाप | रामकृष्ण । |
| ९० | मलिनवासनास्त्यजेद्धि साधनकृद् | " | ९४ | ईश्वरे प्रपत्तिरस्ति सुलभपथो | " |
| ९१ | सस्पृहस्य मुक्तिवचनमस्ति किं नु | " | ९५ | विना शुद्ध-मलिन-विवेकेन मृगो | " |
| ९२ | आत्मजयः स्त्रीषु मातृभाव एव | रामकृष्ण ॥ | ९६ | परानुरक्त ईश्वरे मुक्त एव | रामकृष्ण ॥ |
| ९७ | ज्ञानकर्मभक्तिपथा विमुक्तिदा | रामकृष्ण । | | | |
| ९८ | निर्गुणं च गुणयुतं च परब्रह्म | " | | | |
| ९९ | ईश्वरोऽपि याचनाद्धि पृश्निरभूद् | " | | | |
| १०० | हरेर्नाम गृहे यस्य भयं नास्ति | रामकृष्ण ॥ | | | |

| | |
|---|---|
| **( याच्ञाकथनम् )** | १०१ अनायास-मृत्युमेव यच्छ गुरो रामकृष्ण ।<br>१०२ दैन्यशून्यजीवनं प्रयच्छ देव "<br>१०३ क्लेशरहितमेव मनो मे कुरुष्व "<br>१०४ सत्यपूत-वचो मेऽस्तु मुखे सदा रामकृष्ण ॥ |
| १०५ अहिंसा च रक्तगता भवतु हरे रामकृष्ण ।<br>१०६ पुण्यपापविवेकोऽपि भवेदेव "<br>१०७ ब्रह्मचर्यशक्तिरस्तु मे हि मनसि "<br>१०८ गृध्रवृत्तिरपि मदीय-हृदि च मास्तु रामकृष्ण ॥ | १०९ मतिं देहि बलं देहि पदेस्थलं रामकृष्ण ।<br>११० शुद्धभक्तिरपि तवास्तु पदाम्बुजे "<br>१११ राम एव कृष्ण एव भवानुभय "<br>११२ ब्रह्मरूप शक्तिरूप परमहंस रामकृष्ण ॥ |

**( इति श्रीरामकृष्णनाम संकीर्तनम् समाप्तम् )**